द्वितीयभागः

चतुर्थः पाठः

# ४. अग्निः वायुश्च

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे किं प्रचलति? जनाः किं किं कुर्वन्ति?

२. वायुः द्रष्टुं शक्यते वा? वायोः अस्तित्वं कथं जानीमः?

३. अग्निः वायुः इव जीवने अत्यावश्यकाः प्रकृत्यंशाः के ?



**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

आचार्यः - हे बालाः! श्वः दीपावलीपर्वदिनं खलु! विद्यालयाय विरामः दत्तः।

गोविन्दः - आर्य! एवं चेत् अहम् अद्य सायं जनकेन सह गत्वा बहु दीपावलिसामग्रीं क्रीणामि।

ललिता - अहं तु दीपान् ज्वालयामि।

आचार्यः - दीपावलीसामग्रीं क्रीणन्तु। दीपान् ज्वालयन्तु। एतत् सर्वम् अग्निसम्बद्धं भवति खलु! अतः अद्य अग्नेः नामानि स्मरामः।



**अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः।**
**कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्॥**

**बर्हिश्शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः।**
**आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः॥**

**लोहिताश्वो वायुसखश्शिखावानाशुशुक्षणिः।**
**हिरण्यरेता हुतभुक् दहनो हव्यवाहनः॥**
**सप्तार्चिर्दमुनाश्शुक्रः चित्रभानुर्विभावसुः॥**



पवनः - आचार्य! अग्निः पवनेन विना न ज्वलति खलु!



SCERT TELANGANA



आचार्यः - सत्यम्। अग्नेः वायुसखः इति नाम अपठन् किल! वायुं विना अग्निः न दहति। अतः वयं मित्रधर्मेण वायुनामानि अपि पठामः।

**श्वसनस्स्पर्शनो वायुः मातरिश्वा सदागतिः।**
**पृषदश्वो गन्धवहः गन्धवाहानिलाशुगाः॥**
**समीरमारुतमरुत् जगत्प्राणसमीरणाः।**
**नभस्वद्वातपवनपवमानप्रभञ्जनाः॥**

गोविन्दः - आचार्य! अग्नेः वायोः एतानि अनेकानि नामानि कथम् आगतानि?

आचार्यः - गान्धीमहोदयः किमुक्तवान् जानन्ति वा?

सर्वे - नैव। वदन्तु आचार्य!

आचार्यः - "अहं पादरक्षाणां सीवनसमये चर्मकारः, वस्त्रक्षालनसमये रजकः, क्षुरकर्मसमये क्षुरकः भवामि" इति।

तथैव अग्निः, वायुः, जलम्, आकाशः, भूमिः, सूर्यः इत्यादयः दैनन्दिनजीवने प्रतिपदं, प्रतिक्षणम् अनेकरूपैः अस्माकं साहाय्यं कुर्वन्ति। ते यदा यादृशं कार्यं कुर्वन्ति तदा तान् तादृशेन नाम्ना आह्वयामः।



सर्वे - धन्यवादाः आचार्य!

आचार्यः - शुभं भूयात्। दीपावल्याः शुभकामनाः।



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. धनञ्जयः इति कस्य नाम?

आ. कस्य नाम समीरः?

इ. अग्नेः वायोश्च नामानि वदन्तु ।

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। अदृष्ट्वा कति पदानि वक्तुं शक्नुवन्तीति परस्परं पृच्छन्तु।

| | | | | | |
|---|---|---|---|---|---|
| हुतभुक् | विभावसुः | हव्यवाहनः | दहनः | पावकः | अनलः |
| वह्निः | वैश्वानरः | अग्निः | कृशानुः | धनञ्जयः | सप्तार्चिः |
| वायुसखः | वायुः | सदागतिः | गन्धवाहः | मारुतः | अनिलः |
| मातरिश्वा | प्रभञ्जनः | पृषदश्वः | स्पर्शनः | पवनः | श्वसनः |

आ. अधः दत्तानि पदानि पठित्वा पाठे वर्तुलचिह्नेन अङ्कयन्तु। अग्निनामानि स्वपुस्तिकासु लिखन्तु।

| | | | | |
|---|---|---|---|---|
| वीतिहोत्रः | आशुगः | उषर्बुधः | मरुत् | नभस्वान् |
| आश्रयानः | हिरण्यरेताः | समीरः | शिखावान् | समीरणः |
| शुक्रः | गन्धवहः | शुष्मा | बर्हिः | |

इ. श्लोकस्थानि अग्निनामानि वायुनामानि च गणयित्वा तेषां सङ्ख्यां लिखन्तु।

ई. पाठेऽस्मिन् दत्तान् श्लोकान् पठन्तु। अधः दत्तेषु पदेषु दृष्टानि अग्निनामानि चिन्वन्तु।

| | | | |
|---|---|---|---|
| १) प्रभञ्जनः | २) पृषदश्वः | ३) बृहद्भानुः | ४) जगत्प्राणः |
| १) सदागतिः | २) आशुशुक्षणिः | ३) वातः | ४) मातरिश्वा |
| १) आशुगः | २) जातवेदाः | ३) अनिलः | ४) श्वसनः |

उ. अधः दत्तेषु पदेषु वायुनामानि चिन्वन्तु।

| | | | |
|---|---|---|---|
| १) दमुनाः | २) कृपीटयोनिः | ३) कृष्णवर्त्मा | ४) स्पर्शनः |
| १) शोचिष्केशः | २) अनिलः | ३) तनूनपात् | ४) चित्रभानुः |

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१) अग्निनामानि लिखन्तु।

२) वायुनामानि लिखन्तु।

३) गान्धीमहोदयः किम् उक्तवान्?



### आ. चिन्तयन्तु, लिखन्तु

१) वायोः प्रयोजनानि लिखन्तु?

२) अग्नेः प्रयोजनानि लिखन्तु?

३) चित्रे अग्निस्थानानि कानि सन्ति। तानि अतिरिच्य अग्निः कैः रूपैः कुत्र कुत्र वर्तते इति लिखन्तु।

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. कक्ष्यायाः सर्वे छात्राः समूहद्वये उपविशेयुः। प्रथमसमूहस्थः छात्रः वायुनाम वदेत्। द्वितीयसमूहस्थः अग्निनाम वदेत्। पुनः प्रथमसमूहस्थः वायुनाम वदेत्।**

अधः कोष्टकयुक्तं चित्रमेकं दत्तमस्ति। उपरिष्टात् दक्षिणपार्श्वे एकः भागः, वामपार्श्वे एकः भागः इत्येवं विभज्य एकः छात्रः उपरिष्टात् एकं पार्श्वं अन्यः छात्रः द्वितीयपार्श्वं चिनोतु। ततः प्रथमः वायुनाम लिखेत्, द्वितीयः अग्निनाम लिखेत्। एवम् एकैकं पार्श्वं पूरयन्तः अन्तिमकोशं प्रविशेयुः। यः प्रथमं कोष्टकान् पूरयति सः जयं प्राप्नोति।



SCERT TELANGANA

आ. गृहेषु प्रदर्शितानां नामफलकानाम् अनुसारं रेखया चित्राणि योजयन्तु। एका रेखा अन्यरेखां न स्पृशेत्।

- शिक्षिका
- क्षुरकः
- चालकः
- कुम्भकारः
- वैद्यः
- स्वर्णकारः
- तन्तुवायः
- सैनिकः


सैनिकः


क्षुरकः


अर्चकः


कुम्भकारः


गायिका


नर्तकी


आपणिकः


तन्तुवायः

SCERT TELANGANA

**कोष्टकस्थानि क्रियापदानि स्वीकृत्य के किं कुर्वन्ति इति लिखन्तु।**

| |
|---|
| निर्माति, वयति, नृत्यं करोति, अर्चति, चालयति, तनोति, वैद्यं करोति, नापयति, विलिखति, गायति वार्ताम् आनयति, सीव्यति, रक्षति, विक्रीणाति, रथयति, यच्छति । |



वार्ताहरः



शिक्षिका



लिपिकः



चालकः



वैद्यः



स्वर्णकारः



चित्रकारः



लोहकारः

- लोहकारः ☐
- अर्चकः ☐
- गायिका ☐
- चित्रकारः ☐
- नर्तकी ☐
- आपणिकः ☐
- वार्ताहरः ☐
- लिपिकः ☐

उदा - सैनिकः रक्षति। .................. .................. ..................

.................. .................. .................. ..................

.................. .................. .................. ..................

.................. .................. .................. ..................

SCERT TELANGANA

## ५. व्याकरणांशाः



### अ. अधः दत्तानि चित्राणि पश्यन्तु। वाक्यानि पठन्तु।

| | | |
|---|---|---|
|  बालकः |  चषकः |  बालकः <u>चषकेण</u> पिबति। |
|  आरक्षकः |  दण्डः |  आरक्षकः <u>दण्डेन</u> ताडयति। |
|  अम्बा |  छुरिका |  अम्बा <u>छुरिकया</u> कर्तयति। |
|  लता |  नासिका |  लता <u>नासिकया</u> जिघ्रति। |
|  शिक्षिका |  लेखनी |  शिक्षिका <u>लेखन्या</u> लिखति। |
|  गणेशः |  वाहनम् |  गणेशः <u>वाहनेन</u> गच्छति। |
|  क्रीडाकारः |  कन्दुकम् |  क्रीडाकारः <u>कन्दुकेन</u> क्रीडति। |

☞ उपरितनवाक्येषु रेखाङ्कितानि पदानि तृतीयाविभक्तेः रूपाणि।

### आ. उदाहरणानुसारं रिक्तस्थानेषु समुचितानि तृतीयाविभक्तिरूपाणि लिखन्तु।

उदा - मालाकारः **सूत्रेण** मालां रचयति। (सूत्रं)

कृषकः ............................ क्षेत्रं कर्षति। (हलः)

क्रीडाकारः .....................प्रहरति। (पादः)

आपणिकः ......................... तोलयति। (तुला)

चित्रकारः ............................ चित्रं लिखति। (कूर्ची)

सौचिकः ...................................कर्तयति। (कर्तरी)

अर्चकः ................................देवम् अभिषिञ्चति। (जलं)

SCERT TELANGANA

ऋ. अधः दत्तानि पदानि पठन्तु। एतानि तृतीयाविभक्तेः रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गे | चषकेण | चषकाभ्यां | चषकैः |
| | चमसेन | चमसाभ्यां | चमसैः |
| | दण्डेन | दण्डाभ्यां | दण्डैः |
| | पादेन | पादाभ्यां | पादैः |
| स्त्रीलिङ्गे | छुरिकया | छुरिकाभ्यां | छुरिकाभिः |
| | नासिकया | नासिकाभ्यां | नासिकाभिः |
| | लेखन्या | लेखनीभ्यां | लेखनीभिः |
| नपुंसकलिङ्गे | वाहनेन | वाहनाभ्यां | वाहनैः |
| | कन्दुकेन | कन्दुकाभ्यां | कन्दुकैः |

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. चित्रं दृष्ट्वा वायुः, सूर्यः - एतयोः मध्ये कः बलवान् इति विषयस्य आधारेण "अहं बलवान्" इति शीर्षिकां दत्वा एकां कथां स्वीयभाषया लिखन्तु। तां नाटकरूपेण प्रदर्शयन्तु।



## ७. परियोजनाकार्यम्



अ. वायोः अग्नेश्च विविधसामाजिकोपयोगीनि दृश्यचित्राणि सङ्कलय्य, भित्तिपत्रिकासु स्थापयन्तु।

आ. विविधवृत्तीनां कर्मकराणां च चित्राणि सङ्गृह्य आनयन्तु, भित्तिपत्रिकासु लेपयन्तु।

## ८. प्रशंसा



शङ्करः - मम नाम शङ्करः। अहमत्र नूतनः। तत्र पार्श्वे एव मम गृहम्। मम पुत्रीं विद्यालये प्रवेशयितुम् आनीतवान्। प्रवेशार्थं कियत् धनं आवश्यकम्।

राजेश्वरः - सर्वकारविद्यालयः खलु। धनम् अनावश्यकम्। परन्तु पाठशालायै किमपि कार्यं आवश्यकं चेत् वयं स्वयमेव कुर्मः।

शङ्करः - अस्मिन् विद्यालये विद्युत् नास्ति किम्?

राजेश्वरः - विद्युतः व्यवस्था अस्ति। परिकरेषु कोऽपि दोषः स्यात्।

शङ्करः - भवतु। तत्समीकरणमेव मम वृत्तिः। अत्र प्रधानफ्यूजमध्ये एका तन्त्री नष्टा भवेत्। इदानीं परिकरान् नानीतवान्। मध्याह्ने आगत्य समीकरोमि।

राजेश्वरः - भवान् उत्तमः। तथा करोति चेत् सर्वे छात्राः उपाध्यायाः च आनन्दम् अनुभवन्ति। समाजकार्यं खलु।

(भवान्/भवती अपि विद्यालयार्थं किं कर्तुं इच्छति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठस्थश्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. अग्नि-वायुनामानि वक्तुं शक्नोमि । | | | |
| ३. अग्नेः, वायोः प्रयोजनानि लेखितुं शक्नोमि । | | | |
| ४. चित्रं दृष्ट्वा कथां लेखितुं शक्नोमि । | | | |

**अक्रोधेन जयेत् क्रोधम्**

SCERT TELANGANA